# PT4/ANNUAL EXAMINATION, 2022-23

## SANSKRIT

**Time - 3 hrs.** **Class – VI (Set-B)** **M.M. – 80**

*Name of the student ___________________________________ Section ____ Date - 07.02.2023 (Tuesday)*

**निर्देशाः –**
- **सर्वे प्रश्नाः अनिवार्याः सन्ति ।**
- **प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।**
- **प्रश्नपत्र चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।**

## खण्ड – क (अपठितावबोधनम् – 10 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

वसन्तः ऋतुराजः भवति । चैत्रे वैशाखे च मासे वसन्तः भवति । वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः । प्रथमः उत्सवः वसन्तः उत्सवः अस्ति । द्वितीयः उत्सवः होलिकोत्सवः भवति । वसन्तस्य उत्सवे तु सर्वत्र प्रमादः, हासः–परिहासः च भवति । नराः, बालाः, महिलाः कन्याः च गायन्ति इतस्ततः नृत्यन्ति । होलिकायाः उत्सवः फाल्गुनमासस्य पूर्णिमायां भवति । नराः, महिलाः, बालाः, बालिकाः वृद्धाः च सर्वे जनाः एव प्रसन्नाः भवन्ति। जनाः परस्परं रक्तचूर्णम्, पीतचूर्णम्, पाटलचूर्णम्, हरितचूर्णम् च क्षिपन्ति । सर्वे परस्परं मिलन्ति मिष्टान्नम् च खादन्ति ।

**क) एकपदेन उत्तरत –** **(1×4=4)**

क) ऋतुराजः कः भवति ?

ख) प्रथमः उत्सवः कः भवति ?

ग) द्वितीयः उत्सवः कः भवति ?

घ) होलिकोत्सवे जनाः किम् खादन्ति ?

**ख) पूर्णवाक्येन उत्तरत –** **(1×2=2)**

क) वसन्तस्य उत्सवे जनाः किं किं कुर्वन्ति ?

ख) होलिकोत्सवे जनाः किं कुर्वन्ति ?

**ग) गद्यांशस्य उचितं शीर्षकं चित्वा लिखत ।** **(2)**

क) ऋतुराजः वसन्तः ख) दीपावली

**घ) निर्देशानुसारं उत्तरत –** **(1×2=2)**

अर्थं चिनुत – क) 'हासः' । (हँसी / खेलना)

ख) मिष्टान्नम् । (गुलाबी पाउडर / मिठाई)

## खण्ड – ख (रचनात्मककार्यम् – 15 अंकाः)

**प्र.2 अधोलिखितं वार्तालापं मञ्जूषातः पदं चित्वा पूरयत –** **(1×5=5)**

**मञ्जूषा –** वर्णम्, सुन्दरम्, काकः, कुक्कुटः, कृष्णम् ।

काकः – अहम् तु 'का' 'का' इति करोमि अतएव मम नाम (1)............... अस्ति ।

काकः – मम (2)............... कृष्णम् अस्ति पिकस्य वर्णम् अपि (3)............... भवति ।

पिकः – कुक्कुटः तु कुट् कुट् एव करोति अतएव वयं तम् (4)............... कथयामः ।

कुक्कुटः – न तु मम स्वरः एव सुन्दरः, न मम पिच्छम् एव (5)............... अस्ति ।

**प्र.3 चित्रं दृष्ट्वा मञ्जूषायाः शब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत –** **(2x5=10)**

| **मञ्जूषा –** | पञ्जरे, गजौ, सिंहः, तिष्ठति, जन्तुशाला, वानराः, पश्यन्ति, भ्रमतः, चित्रकः, वृक्षे, कदलीफलम्, खादतः, एतत्, इतःततः, अपि, अस्ति, सन्ति, जनाः, चित्रम् । |
|---|---|



## खण्ड – ग (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

**प्र.4 उचितम् अव्ययं चित्वा रिक्तस्थानानि पूरयत –** **(1×5=5)**

| **मञ्जूषा –** | **ह्यः, मिथ्या, परश्वः, मन्दम्-मन्दम्, अद्य ।** |
|---|---|

क) सा ................. हसति ।

ख) जनकः तु कदापि................. न वदति ।

ग) .................. शनिवासरः अस्ति ।

घ) .................. चन्द्रवासरः भविष्यति ।

ङ) .................. शुक्रवासरः आसीत् ।

**प्र.5 अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत –** **(1×5=5)**

क) वे सब दौड़ते हैं ।

ख) वह पढ़ती है ।

ग) मैं लिखता हूँ ।

घ) लता लिखती है ।

ङ) हाथी चलते हैं ।

**प्र.6 शब्दरूपाणि लिखत -** **(1×5=5)**

| शब्द | लिंग | विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|---|
| तत् | पुल्लिंग | प्रथमा | सः | तौ | (1)........... |
| तत् | स्त्रीलिंग | द्वितीया | ताम् | ते | ताः |
| तत् | स्त्रीलिंग | तृतीया | तया | ताभ्याम् | (2)........... |
| किम् | पुल्लिंग | चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| किम् | पुल्लिंग | पञ्चमी | (3)........... | काभ्याम् | केभ्यः |
| किम् | स्त्रीलिंग | षष्ठी | कस्याः | कयोः | (4)............ |
| किम् | नपुंसकलिंग | सप्तमी | कस्मिन् | (5).......... | केषु |

**प्र.7 धातुरूपाणि लिखत -** **(1×5=5)**

| लकार | पुरुषः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|
| लट्लकार | प्रथम - | नमति | (1)............ | नमन्ति |
| | मध्यम - | नमसि | नमथः | नमथ |
| | उत्तम - | (2).......... | नमावः | नमामः |
| लृट्लकार | पुरुषः | एकवचन | द्विवचन | बहुवचन |
| | प्रथम - | खादिष्यति | खादिष्यतः | (3).......... |
| | मध्यम - | खादिष्यसि | (4)......... | खादिष्यथ |
| | उत्तम - | खादिष्यामि | खादिष्यावः | (5).......... |

## खण्ड - घ (पठितावबोधनम् - 35 अंकाः)

**प्र.8 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

एकदा दश बालकाः स्नानाय नदीम् अगच्छन् । ते नदीजले चिरं स्नानम् अकुर्वन् । ततः ते तीर्त्वा पारं गताः । तदा तेषां नायकः अपृच्छत् - अपि सर्वे बालकाः नदीम् उत्तीर्णाः ? तदा कश्चित् बालकः अगणयत् - एकः, द्वौ, त्रयः, चत्वारः, पञ्च, षट्, सप्त, अष्टौ, नव इति । अतः ते (बालकाः) निश्चयम् अकुर्वन् - यत् दशमः नद्यां मग्नः । ते दुःखिताः तूष्णीम् अतिष्ठन्।

तदा कश्चित् पथिकः तत्र आगच्छत् । सः तान् बालकान् दुःखितान् दृष्ट्वा अपृच्छत् - बालकाः! युष्माकं दुःखस्य कारणं किम् ? बालकानां नायकः अकथयत् - 'वयं दश बालकाः स्नातुम् आगताः। इदानीं नव एव स्मः। एकः नद्यां मग्नः' इति।

**प्रश्नानामुत्तराणि लिखत -** **(2×5=10)**

क) बालकाः स्नानाय कुत्र अगच्छन् ?

ख) ते नदीजले चिरं किं अकुर्वन् ?

ग) तदा कः तत्र आगच्छत् ?

घ) पथिकः तान् बालकान् दुःखितान् दृष्ट्वा किम् अपृच्छत् ?

ङ) अतः ते(बालकाः) किं निश्चयम् अकुर्वन् ?

**प्र.9 अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -** **(1×5=5)**

क) शृगालस्य मित्रं कः आसीत् ?

ख) अस्माभिः किं वक्तव्यम् ?

ग) श्रमेण का सरसा भवति ?

घ) के वायुयानं रचयन्ति ?

ङ) अजीजः कां व्यथां श्रावयति ?

**प्र.10 तृतीयाविभक्तिं प्रयुज्य वाक्यानि रचयत -** **(1×5=5)**

क) सा .................. जलेन मुखं प्रक्षालयति । (विमल)

ख) राघवः .................. विहरति । (विमानयान)

ग) कण्ठः .................. शोभते । (मौक्तिकहार)

घ) नभः .................. प्रकाशते । (सूर्य)

ङ) पर्वतशिखरम् .................. आकर्षकं दृश्यते । (अम्बुदमाला)

**प्र.11 विलोमपदानि योजयत -** **(1×5=5)**

| | | |
|---|---|---|
| क) | सुखदम् | शीते |
| ख) | जागृतस्य | विकीर्य |
| ग) | ग्रीष्मे | दुःखदम् |
| घ) | चित्वा | मूर्खः |
| ङ) | चतुरः | सुप्तस्य |

**प्र.12 पर्यायपदानि योजयत -** **(1×5=5)**

| | | |
|---|---|---|
| क) | वैनतेयः | दिवाकरः |
| ख) | धरित्री | अकस्मात् |
| ग) | गगने | गरुडः |
| घ) | सूर्यः | पृथ्वी |
| ङ) | सहसा | आकाशे |

**प्र.13 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

**मञ्जूषा - अद्य, गृहीत्वा, एव, कदा, च ।**

क) पुस्तकानि .................... विद्यालयं गच्छ ।

ख) त्वम् .................... मातुलगृहं गमिष्यसि ?

ग) बालकाः बालिकाः .................... क्रीडाक्षेत्रे क्रीडन्ति ।

घ) .................... रविवासरः अस्ति ।

ङ) सत्यम् .................... जयते ।